श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मुक्कुर् लक्ष्मीनृसिंहदासेन कृतम्

# ॥ श्रीनङ्गैनल्लूर् मङ्गळम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीनङ्गैनल्लूर् मङ्गळम् ॥

नङ्गैनल्लूर् अग्रहारे नतानां फलमद्भुतम्।
दृश्यते भद्रया भद्रो यज्ञेशो नृहरिः परः॥ १ ॥

नङ्गैनल्लूर् निवासाय तुङ्ग मङ्गळ रूपिणे।
गङ्गा सलिल पादाय श्री नृसिंहाय मङ्गळम्॥ २ ॥

नवनीताय कृष्णाय नवमोहन रूपिणे।
नङ्गैनल्लूर् निवासाय श्री नृसिंहाय मङ्गळम्॥ ३ ॥

रामाय रामभद्राय रमालोलाय धीमते।
नङ्गैनल्लूर् निवासाय श्री नृसिंहाय मङ्गळम्॥ ४ ॥

श्रीनिवासाय निधये श्रीधराय महात्मने।
नङ्गैनल्लूर् निवासाय श्री नृसिंहाय मङ्गळम्॥ ५ ॥

सुदर्शनाय देवाय सुप्रसन्नाय चक्रिणे।
नङ्गैनल्लूर् निवासाय श्री नृसिंहाय मङ्गळम्॥ ६ ॥

षण्णवती महायज्ञे शोभिताय गुणात्मने।
नङ्गैनल्लूर् निवासाय श्री नृसिंहाय मङ्गळम्॥ ७ ॥

धनुर्धराय देवाय धीराय परमात्मने।
नङ्गैनल्लूर् निवासाय श्री नृसिंहाय मङ्गळम्॥ ८ ॥

नारायण यतीन्द्रेण अर्चिताय स्थिराय च।
नङ्गैनल्लूर् निवासाय श्री नृसिंहाय मङ्गळम्॥ ९ ॥

मट्टपल्लि श्रीनृसिंह प्रियाय परमात्मने।
नङ्गैनल्लूर् निवासाय श्री नृसिंहाय मङ्गळम्॥ १० ॥

मङ्गळगिरि नाथाय वेदाद्रि पुर् वासिने।
नङ्गैनल्लूर् निवासाय श्री नृसिंहाय मङ्गळम्॥ ११ ॥

घटिकाचलान्तर्वेद्याम् सुस्थिराय वराय च।
नङ्गैनल्लूर् निवासाय श्री नृसिंहाय मङ्गळम्॥ १२ ॥

हृषीकेश यादगिर्यां शोभनाद्रि निवासिने।
नङ्गैनल्लूर् निवासाय श्री नृसिंहाय मङ्गळम्॥ १३ ॥

श्री मट्टपल्लि नाथाय नैमिशारण्य रूपिणे।
नङ्गैनल्लूर् निवासाय श्री नृसिंहाय मङ्गळम्॥ १४ ॥

दीपालयाय देवाय सिंहाचल निवासिने।
नङ्गैनल्लूर् निवासाय श्री नृसिंहाय मङ्गळम्॥ १५ ॥

बृन्दावन विहाराय श्रीरङ्गपुर् शायिने।
नङ्गैनल्लूर् निवासाय श्री नृसिंहाय मङ्गळम्॥ १६ ॥

मट्टपल्ल्यान् नङ्गैनल्लूर् आगताय स्थिराय च।
नङ्गैनल्लूर् निवासाय श्री नृसिंहाय मङ्गळम्॥ १७ ॥

मुक्कूर् नृसिंहदासेन जयमङ्गळमद्भुतम्।
नारायण योगिवर्य कृपया प्रोक्तमव्ययम्॥ १८ ॥

॥ इति श्रीनङ्गैनल्लूर् मङ्गळं संपूर्णम् ॥